# संस्कृतवर्णोच्चारणप्रक्रियाः प्रकाराः स्थानानि च

**डॉ. अमृता कौर**

सहायकाचार्या, शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानं जयपुरपरिसरः

जयपुरम्, राजस्थानम्

जगतव्यवहारमूलभाषा वाक्यसमूहरुपा। शब्दसमूहे वाक्यम् अर्थपरिसमाप्तौ। श्रोत्रेन्द्रियग्राह्योऽर्थप्रत्यात्मको वर्णात्मकः शब्दः विभागानर्हो ध्वनिरक्षरं वर्णोवा। उच्चार्यमाणां शब्दानां विभागे कृते सूक्ष्मतया अवयवाः खलु वर्णाः इत्याख्यान्ते। यः वर्णः यस्यां भाषायां व्यवह्रीयते स तद्भाषावर्णः । यथा क इति संस्कृतभाषावर्णः केचिद् वर्णाक्षरयोः समपर्यायत्वं मन्यन्ते । अतः अक्षरसमूहानां अपरः नाम भवति वर्णः। वर्णं तु चाक्षरे इत्यमरः । तर्हि किमिदम् अक्षरम् ? नक्षीयते न क्षरतीति वाक्षरम् महाभाष्ये एवमुक्तम् –

*अक्षरं नक्षरं विद्यादश्नोतेर्वा सरोऽक्षरम् ।*

*वर्ण वाहुः पूर्वं सूत्र किमर्थमुपादिश्यते ॥*

अपि च श्रोतोपल्ब्धि बुद्धिनिग्राह्यः प्रयोगेणाभिज्वालितः आकाशदेशः शब्दः । वर्णः श्रोत्रेण उपलभ्यते । बुद्ध्या निश्चयेन ग्राह्यते । प्रयोगेण स अभिव्यक्तौ भवति । किं च आकाशादेशः अस्य वर्णस्य, स एव शब्दः कथ्यते । आधुनिकाः भाषाशास्त्रिणः वर्णस्य लक्षणं स्व स्व कृतीषु प्रस्तुतवन्तः यथा –

1. **M.S. Heffner** महोदयः – एकश्वासवेगोच्चार्यत्वमक्षरम् । इति लक्षणं चक्रे ।

"Each Syllable is basically a movement complex in which the larger underlying movement is the breath pulse or

trust of the chest musculature which creates a compression of air in the lungs."

2. **Danciel Jones** महोदयः एवमाह- Syllable is essentially a small sound sequence Containing a peak of prominence.

एवं भाषायाः लघुतमोंऽशः भवति वर्णः । वर्णाः स्वरव्यञ्जनभेदेन द्विधा भिद्यन्ते। येषामुच्चारणेऽन्य साहाय्यं नापेक्षते ते स्वराः । तद्यथा स्वयं राजन्ते इति स्वराः। स्वराणाम् उच्चारणे स्वतन्त्रं भवति । अर्थात् प्रत्येकः स्वरवर्णः व्यञ्जनवर्णानाम् असहयोगेन पूर्णरुपेण स्वतन्त्र भावेन उच्चारितः भवति ।

पतञ्जलि मतानुसारं यः स्वयं सुशोभितः भवति तं स्वरः इति उच्यते । यथा – यः स्वयं राजते तं तु स्वरमाह पतञ्जलिः । "स्वराः विंशतिरेकश्च" पाणिनेरुक्त्यानुसारं एकविंशतिस्वराः सन्ति । पुनः मता-कालानुसारेण स्वरवर्णस्य त्रयी भेदाः भवन्ति । यथा= ह्रस्व- दीर्घ- प्लुतश्च ।

**ह्रस्वस्वरः**- यस्य अचः उच्चारणे एकमात्रिकोच्चारणकालः अपेक्षते । सः ह्रस्वस्वरः यथा – अ, इ, उ इत्यादयः ।

**दीर्घस्वरः** – यस्य अचः उच्चारणे द्विमात्रिकोच्चारणकालः अपेक्षते, सः दीर्घस्वरः यथा- आ, ई, ऊ इत्यादयः ।

**प्लुतस्वरः** –यस्योच्चारणे त्रिमात्रिकोच्चारणकालः अपेक्षते सः प्लुतस्वरः यथा आ३ ।

उच्चारणे आरोहावरोहक्रमदृष्ट्या अपि अचः स्वरस्य त्रयो भेदाः भवन्ति ।

उदात्त – अनुदात्त – स्वरितश्चेति ।

**उदात्तस्वरः** - "उच्चैरुदात्तः" ताल्वादिस्थानेषु अधोभागेषु निष्पन्नोऽच् उदात्तसंज्ञको भवति । यथा – आ, ए इत्यत्र उभावपि उदात्तौ ।

**अनुदात्तस्वरः** – नीचैरनुदात्तः" ताल्वादिषु अधोभागेषु निष्पन्नोऽच् अनुदात्तसंज्ञको भवति। यथा – अर्वाङिगति ।

**स्वरितस्वरः** – उदात्तत्वम् , अनुदात्तत्वम् इत्युभयोः यस्मिन् अचि समिश्रणं भवति सः स्वरितस्वरः भवति यथा- कवोऽश्वा रथानां न येऽराः । एवं अचः नवभेदाः सञ्जाताः । ते नवविधाः अचः अनुनासिकानुनासिकभेदेन द्वेधा भूत्वा अष्टादशसंख्यकाः भवन्ति । व्यञ्जनानां विषये पतञ्जलि महर्षिणा निगदितम् अन्वग्भवति व्यञ्जनं येषामुच्चारणं स्वरं विना नैव शक्यते ते व्यञ्जनाः भवन्ति इति ज्ञेयम् । स्वराः व्यतीतः अन्य वर्णाः व्यञ्जनसंज्ञकः भवन्ति। (सर्वशेषो) व्यञ्जनानि । सर्वासां शिक्षानुसारं व्यञ्जनाः भिन्नाः भवन्ति। यथा– याज्ञवल्क्यशिक्षा- ४५, पाणिनीयशिक्षा- ४२, वर्णरत्न-प्रदीपिकाशिक्षा- ४१, गौतमशिक्षा- ३७, माण्डुकीयशिक्षानुसारं- ४६ व्यञ्जनवर्णाः सन्ति ।

✡ **वर्णोद्गमप्रकाराः** –

*स्रोतोमार्गस्याविभक्तत्वहेतोः स्वतन्त्रवर्णानां जायते न प्रकाशः ।*

*तावद् यावद् कण्ठमूर्धादिभेदो वर्णव्यक्तिः स्थानसंख्या यतोऽतः ॥*

उक्तिरियं बोधयति यत् उर्ध्वगामी शरीरस्थो वायुरेकेनैव स्रोतमार्गेण प्रवहन्नेकरुपेण तिष्ठति । तदानीं न कोऽपि वर्णः प्रकाशमधिगच्छति । परस्परात् कण्ठमूर्धादिषुच्चारणस्थानेषु वायोरभिघातानन्तरमेव वर्णाभिव्यक्तिः भवति ।

शरीरस्थ कस्मात् स्थानान्निर्गत्य वायुवर्णोत्पत्तिं सम्पादयतीति प्रश्ने फुप्फुसादिति वदन्त आधुनिक भाषातत्वज्ञः फुप्फुसात्पूर्वं वायुव्यापारविषये मौनं भजन्ते। नागेशप्रमुखा विद्वांसस्तु कण्ठचक्रे स्थितायाः वैखरीवाचः पूर्ववर्त्ती या हृदयचक्रस्था फुप्फुसास्थाना मध्यमा वाग् विद्यते ततः नाभिचक्रे पश्यन्ती नाम्नीं तत्पूर्वं च मूलाधारचक्रे परानाम्नीं वाचमवस्थितां शंसन्तो मूलाधारचक्रादेवं वायुव्यापारम् आचक्षते। वर्णाभिव्यक्तिविषये वोभिद्यन्ते विद्वांसः। आभ्यन्तर- प्रयत्नेन प्रेरितः

प्राणवायुरुर्ध्वमागच्छन् मनः कायाग्निमाहन्ति स कायाग्निः मारुतं प्रेरयति । स मारुतः शब्दप्रयोगेच्छया नाभिप्रदेशादुर्ध्वम् आगच्छन् वक्रं प्राप्य जिह्वाग्रादिस्पर्श पूर्वकं तत् स्थानात् आहत्य वर्णत्वेनाभिव्यञ्जयति । तदुक्तं वृषभदेवाचार्येण–

अन्तर्वर्त्तीना प्रयत्नेनोर्ध्वमुदीरितः प्राणो वायुस्तेजसानुगृहीतः शब्दवहाभ्यः, शुषिभ्यः सूक्ष्मांशं धूमसन्तानवत्सहन्ति। स स्थानेषु शब्दघनः सहन्यमानः प्रकाशमात्रया कयाचिदन्तः संन्निवेशिनः शब्दस्याविभक्तं विम्बमुपगृहणाति ।

**वर्णोद्गमविषये प्रातिशाख्ये**

एवमुक्तं मनोभिहितः कायाग्निः प्राणं प्रेरयति स च प्राणवायुर्नाभेरुद्यन। मूर्धानमभिहितोऽन्येन पुनरुद्यता वायुना संताड्यमानः "क" "ख" इत्येवमादिर्ध्वनिरुत्पद्यते । तद्यथा मनोभिहितः कायाग्निः प्राणमुदीरयति । स नाभेरुद्यन् मूर्धन्यभिहितोऽन्येन पुनरुद्यता मारुताभिहन्यमानो ध्वनिः सम्पद्यते। क इति वा ख इति वा ।

पाणिनेः मतानुसारम् अन्तः करणं संस्कारवशात् धटपादाद्यर्थान् स्ववृत्या एकबुद्धिविषयं सम्पाद्य पदार्थबोधेच्छया निजपरिमाणविशेषं मनः योजयति। तच्चमनः जठराग्निम् अभिहन्ति। जठराग्निः आहतो अग्निं अभिहन्ति। आहतोग्निःप्राणनामकं वायुविशेषं प्रेरयति । कायाग्नि प्रेरितोवायुः हृदयदेशे विचरन् मन्दस्वरं जनयति। यश्च स्वरः प्रातः कालीनयज्ञकर्मोपयोगी गायत्रीनामकच्छन्दसा युक्तो भवति ।

ध्वन्यते इति ध्वनिः। ध्वनिः अर्थात् भाषा बोधाय प्रतीकरूपेण येन उच्चारणे अभिप्रायः अवगम्यते सः ध्वनिः। अस्मिन् विषये प्रत्यक्षणप्रमाणसर्वस्वाश्चार्वाका इव पाश्चात्यपण्डिता अनिर्द्देश्यं मूलभूतं तत्वमविवेचयन्तः फुफ्फुसं वर्णानां स्वीकुर्वन्त आत्मन एव वर्णानामुद्गममाचक्षते इति ।

१. **W.S Allen** महोदयेन स्वीये Phonetic in Ancient India ग्रन्थे उदाहृतम् Zeno is quoted as defining speech in term of a stream of air extending from the principal part of the soul to the thought and the tongue and the appropriate organs.

**उच्चारणस्थानानि –**

वर्णोच्चारणसमये मुखाभ्यन्तरे जिह्वा यं यं भागं पूर्णतया स्पृशति, ईषतस्पृष्टं वा यतते स भागस्य वर्णस्य स्थानमुच्यते । तानि च स्थानानि – कण्ठः, मूर्धा, तालुः, दन्तोष्ठौ, नासिका , जिह्वामूलमीति सप्ताः भवन्ति । उरस्यमपि मन्यन्ते । केचनाचार्या इत्यष्टौ तथाचोक्तं पाणिनिशिक्षायाम् –

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।**
**जिह्वामूलं च दन्ताश्च नासिकाष्टौ च तालु च ॥**

**<u>वर्णस्थानसारणी</u>**

| क्र. स. | वर्णाः | | स्थानम् |
|---|---|---|---|
| १. | अकुहविसर्जनीयानम् | - | कण्ठः |
| | अ,क,ख,ग,घ,ङ,ह, । | | |
| २. | इचुयशानाम् | - | तालुः |
| | इ,ई,च,छ,ज,झ ,ञ,य,श । | | |
| ३. | ऋटुरषाणाम् | - | मूर्धा |
| | ऋ,ट, ठ,ड,ढ, ण, र, ष । | | |
| ४. | लृतुलसानम् | - | दन्ताः |
| | लृ,त,थ,द,ध,न,ल,स । | | |
| ५. | उपूपध्मानीयानाम् | - | ओष्ठौ |

उ,ऊ,प ,फ ,ब ,भ, म

६. ञमङणनानाम् - नासिका

ञ,म,ङ,ण,न ।

७. एदैतौ - कण्ठतालुः

ए,ऐ ।

८. ओदौतौ - कण्ठोष्ठम्

ओ, औ ।

९. वकारस्य - दन्तौष्ठम्

व ।

१०.जिह्वामूलीयस्थानिनः - जिह्वमूलीयम्

क, ख

**प्रयत्नानुसारेण वर्णानां विभागः –**

मुख्यतः प्रयत्नो द्विधा भवति – आभ्यन्तरो बाह्यश्च ।

**आभ्यन्तरप्रयत्नाः –**

आभ्यन्तरप्रयत्नाः पञ्च भवन्ति यथा – स्पृष्टः, ईषत्स्पृष्टः, ईषद्विवृतः, विवृतः, संवृतश्चेति । एतेषां आभ्यन्तरप्रयत्नानाम् अनुसारेण वर्णानां विभागः अधः प्रस्तूयते ।

**स्पृष्टप्रयत्नः** – ककारादारभ्य मकारपर्यन्तं पञ्चविंशतेः स्पर्शवर्णानां स्पृष्टनामक आभ्यन्तरप्रयत्नः भवति । तथा च सूत्रं कादयोमावसानाः स्पर्शाः तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् ।

**ईषत्स्पृष्टप्रयत्नः** – यणोन्तस्थाः ईषत्स्पृष्टम् अर्थात् य,र,ल,व इत्याख्यायानां ईषत्स्पृष्टः प्रयत्नो भवति ।

**ईषद्विवृतप्रयत्नः** – शलः उष्माणः ईषद्विवृतं उष्माणाम् अर्थात् श,स,ष , ह इत्येतेषाम् ईषद्विवृतः प्रयत्नो भवति ।

**विवृतप्रयत्नः-** अचः स्वराः विवृतं स्वराणाम् । अर्थात् अ, इ,उ इत्यादिस्वराणां विवृतप्रयत्नो भवति ।

**संवृतप्रयत्नः-** ह्रस्व अकारस्य प्रयोगे संवृतप्रयत्नो भवति किन्तु प्रक्रियादशायां ह्रस्वस्य अकारस्यापि विवृतप्रयत्न एव । एवं आभ्यान्तरप्रयत्नदृष्ट्या सर्वेषामपि वर्णानां विभागः कृतः ।

**बाह्यप्रयत्नाः** – बाह्यप्रयत्नाः एकादश भवन्ति । भाष्यकारेण एतस्य अष्टौ भेदाः स्वीकृताः । ओष्ठादारभ्य आकाकलं यावत् मुखं कथ्यते । वर्णानामोच्चारणे मुखस्थानात् बहिर्देशे गलविवरादीनां सङ्कोचविकासरूपः यः प्रयत्नः स एव बाह्यप्रयत्नः।

**विवारः-** गलविलस्य विकासात् विवारः भवति।

**संवारः** – गलविलस्य सङ्कोचात् संवारो भवति।

**श्वासः** – वायोः आरोहावरोहक्रमः।

**नादः** – वर्णोच्चारणे ध्वनिविशेषः।

**घोषः-** वर्णेन सह श्वासस्य गम्भीरतयाध्वनिविशेषः।

**अघोषः** – वर्णोच्चारणे ईषत् ध्वनिरूपः।

**अल्पप्राणः** – वर्णानामुच्चारणे तत् तत् स्थानानाम् अल्पप्रयोगः।

**महाप्राणः** – वर्णोच्चारणे अधिकस्य वायोः शक्तेर्वा प्रयोगः।

**पाणिनीयशिक्षाग्रन्थेषु वर्णोच्चारणप्रकारः-**

संस्कृतभाषामक्षरध्वनयोः हि विनिश्चिता सन्ति। तदुच्चारणस्थानमपि च सुनिश्चितानि सन्ति। अशुद्धिं ध्वन्युच्चारणात् शब्दोच्चारणमपि अशुद्धिं प्राप्नोति ।

कदाचित् उदात्तानुदात्तस्वरितानां ह्रस्वदीर्घादीनां उच्चारणे भ्रमवशात् अनेकाः अशुद्धयः जायन्ते। अतः ध्वनिस्थानकरणप्रयत्न- मन्त्रस्वरदेवताजातयः इति अष्टौ लक्षणं मनसि निधाय उच्चारणं करणीयम् । पुनः वर्णोच्चारणं काथं करणीयम् इति सन्दर्भेऽस्मिन् पाणिनि तथा याज्ञवलक्यशिक्षायां वर्णितमस्ति यथा –

**व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।**

**भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥**

✡ **पाणिनीयशिक्षायां वर्णोच्चारणप्रक्रिया-**

वर्णानां स्थानप्रयत्नादिभिः सुष्ठु उच्चारणेनैव स्पष्टशब्दः श्रवणं भवति । तेन सम्यक् अर्थावबोधोऽपि भवितुमर्हति। अतः भाषाधिगमे शुद्धवर्णोच्चारणस्यानतिसाधारणमहत्वं वरीवर्त्ती नास्ति अत्र संशीतिः शाब्दिकविपश्चिदाम् । वक्ता वर्णोच्चारणं कथं करोति ? वर्णोच्चारणकाले अन्ते जायमाना प्रक्रिया का भवति ? एतत्सर्वं वैज्ञानिकप्रक्रियाक्रमेण वर्णोच्चारणस्य क्रमिकप्रक्रिया पाणिनीयशिक्षायां वर्णितास्ति यथा-

**आत्मा बुद्ध्या समेत्यर्थान्मनो युङ्क्ते विवक्षया ।**

**मनः कायाग्निमाहन्ति स प्रेतयति मारुतम् ।**

**मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।।**

**अपि च-**

**आकाशात्वायुप्रभवः शरीरात् समुच्चरन् वक्रमुपैति नादः ।**

**स्थानान्तरेषु प्रभिवज्यमानौ वर्णत्वमागच्छति यः सः शब्दः ॥**

ज्ञानशक्तिः, इच्छाशक्तिः, क्रियाशक्तिः इति तिसृषु मुख्य शक्तिष्वस्फुरितासु वर्णोच्चारणं नैव सम्भवति । आदौ ज्ञानशक्तिराविर्भवति। यस्य वस्तुनोऽवबोधार्थमुच्चारणं क्रियते। ज्ञानशक्ति तद्वस्तु प्रासङ्गिकवस्तु अन्तरैस्तस्य च सम्बन्धमित्युभयं बोधयति । यथा अहं ग्रामं गच्छामि इत्युक्ते तत्रत्यानां पदानामर्थः तेषां

परस्परसम्बन्धश्च प्रथमं बुध्यते । ज्ञानोदयानन्तरम् इच्छाशक्तिः जागर्त्ति । ततो ज्ञातानां वस्तुनां मध्यात् कस्यचिद्विषये वक्तुमिच्छा भवति। इच्छाशक्तेः उन्मेषानन्तरं जैवस्पन्दनात् क्रियाशक्तेः उद्रेको भवति। स्वयं उद्रिकाया च क्रियाशक्तौ अवमूर्त्तौ जीवात्मा मूर्त्तमभौतिकमन्तरिन्द्रयं मन उत्थाय कार्ये नियोजयति । तच्च सव्यापारीभूय कायवर्त्तीनं महाभूतमग्निमुद्दीपयति । प्राणी यतकिमपि कर्म कुरुते, तत्रशारीरिकतपः कारणं भवति। असति तपे तु न किमपि कर्त्तुं शक्यते। उच्चारणकार्यार्थमपि कायाग्नेरूत्तेजनमपरिहार्यम्। उत्तेजितस्य कायाग्निरन्यं महाभूतं वायुं प्रेरयति। स च वायुर्वैखरीसीम्नी प्रसरन् मन्दमध्यमस्तारान् स्वराञ्जनयतीति वर्णोच्चारणप्रक्रिया।

**संस्कृतभाषायां मौखिकाभ्यासस्य महत्वम्-**

विश्वेऽस्मिन् वेदानां प्राचीनता सर्वैरप्यङ्गीक्रियते। तेषां च वेदानाम् उच्चारणप्रक्रियाविषये दत्तावधानस्तद्रष्टारो मुनयः शिक्षाग्रन्थेषु उच्चारणविधिं वर्णितवन्तः। एकस्यापि शब्दस्यासाधुच्चारणमिह अनर्थायैव कल्प्यत इति तत्तच्छिक्षाग्रन्थेषु महत्वमस्य वर्णितम् । शुद्धतापूर्वकं वर्णानाम् उच्चारणेन इहलोके सम्मानस्तु प्राप्यते तथैव ब्रह्मलोकेऽपि प्रतिष्ठां प्राप्यते इति संस्कृतभाषायां वर्णोच्चारणस्य अनतिसाधारणमहत्वं विद्यते । यथा-

**एवं वर्णाः प्रयोक्तव्या नाऽव्यक्ता न च पीडिताः ।**
**सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥**

**एवमेव-**

**सुतीर्थादागतं व्यक्तं स्वाध्यायं सुव्यवस्थितम् ।**
**सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्मराजते ।**

भाषाशास्त्रे वर्णोच्चारणस्य अतिमहत्त्वं वर्तते। अशुद्धं खलुच्चारणं विवक्षितमर्थं नैव प्रतिपादयति । अस्मिन्प्रसङ्गे पतञ्जलिना महाभाष्ये प्रोक्तम् –

**मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह ।**

**सवाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**

**(म. भाष्यम्)**

दुष्टः शब्दः समासद्वयं भवति । बहुव्रीहिस्तत्पुरुषश्च तत्र इन्द्रः शत्रुः यस्य इति बहुव्रीहौ पूर्वस्येन्द्रपदस्य स्वरे उदात्तता । ततः च इन्द्रस्य प्राधान्यं शत्रोश्च गुणीभावः तत्र शत्रोरुदात्तारौ तत्पुरूषे कर्त्तव्ये, कृते च बहुव्रीहिसमासे स्वरवैपरीत्यात् फलवैपरीत्ये इन्द्रस्य शत्रोर्वृत्रस्य विनाशोऽभवत् । अतः एवोच्यते शुद्धोच्चारणस्यापूर्वं महात्म्यमिति।

अशुद्धोच्चारणं खलु विवक्षितमर्थं नैव प्रतिपादयति । अतः शुद्धोच्चारणस्य महत्वं मनसि निधाय तस्य शक्यतामुद्भावयितुं उच्चारणस्थानप्रयत्नादीनां ज्ञानं विद्यार्थिनः शिक्षेरन्निति नितरामावश्यकं शिक्षणविधयः निरूपिताः वर्तन्ते ।

**संस्कृतेमौखिकाभ्यासार्थं शिक्षणविधयः –**

संस्कृतशिक्षणे साम्प्रतिकी स्थितिं परिवर्त्तयितुम् अन्यान्यनूतन मनोवैज्ञानिक शिक्षणविधीनां प्रयोगः करणीयः। यथा- प्रत्यक्ष-अभिनय-संरचनासम्प्रेषणादीनां विधीनां प्रयोगः, सङ्गीत-नृत्य नाटकादीनां माध्यमेन रुच्युत्पादनम्, भाषाक्रीडा, प्रश्नोत्तरविधिः, स्फोरकभित्तिपत्र संश्लेषणां प्रयोगः, एवं प्रहेलिकां – हास्यकणिका- लघुकथादीनां प्रयोगः।

मुख्यतः पाठ्यक्रमे विषयाणां वैविध्यं भवेत् । विशेषतः संस्कृतमाध्यमेन शिक्षणार्थं पाठ्यक्रमे परिवर्त्तनमनिवार्यम् । महाभाष्ये उक्तम् –

ज्ञाने धर्मः उतप्रयोगे अतः अध्यापकस्य कृते ज्ञानप्रयोगयोरुभयोः निपुणता आवश्यकी भवति ।

अतः पाठ्यक्रमे नूतन वैज्ञानिकांशानां, व्यवसायिकांशानाञ्च समावेशोऽपेक्षितः । यतोहि "श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः" (मनु १२/१०३) । शिक्षणं तु अध्यापकस्याधीने भवति । गृहे माता प्रथमा शिक्षिका, पिता द्वितीयशिक्षकः, तृतीयस्तु समाजे आचार्यः । तद्विषये कालिदासेन मालविकाग्निमित्रे अध्यापकस्य लक्षणं प्रतिपादितम्।

**श्लिष्टा क्रिया कस्यचिदात्म संस्था,**
**संक्रान्तिरन्यस्य विशेषयुक्ता ।**
**यस्योभयं साधु स शिक्षकाणां,**
**धुरि प्रतिष्ठापयितव्य एव ।।**

अतः स एव उत्तमः शिक्षकः भवति यस्य पार्श्वे ज्ञानं भवति । तथा अन्येषां कृते संक्रान्तिः कथं करणीयमिति उभयगुणयुक्तः शिक्षकः साधु भवति ।

अतः अध्यापकः सर्वथा जागरुको भूत्वा पाठं पाठयेयुः यथा क्षेमेन्द्रः उवाच –

**काव्येषु माधुर्यमनोरमेषु कुर्यादखिन्नः श्रवणाभियोग्यम् ।**
**गीतेषु गाथास्वथ देवभाषा काव्येषु दद्यात् सरसेषु कर्णम् ।।**

**( क्षेमेन्द्रः कलाविलासः )**

**चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**
**गुहायां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।(ऋग्वेदः)**

तासु चतसृष्वपि वाक्षु केवलं वैखरी वाचमेव प्रयुज्यन्ते साधारणजनाः । मानवलोके यदा ज्ञानज्योतिः उद्भवत् तदारभ्य अद्य यावत् याः शिक्षाः, यानि ज्ञानविज्ञानानि सन्ति । ताः शिक्षाः तानि विज्ञानानि संस्कृतभाषायां समुल्लसन्ति । परन्तु भाषाशिक्षणार्थं प्राचीनकालादारभ्य अद्यावधिपर्यन्तं बहवः आचार्याः चिन्तकाः शिक्षाशास्त्रिणश्च स्व स्व विद्यमानक्षेत्रे स्व स्व मतानुसारेण शिक्षणविधीनां चर्चां स्वकृतिषु प्रतिपादितवन्तः । तेषु भारतीयाः पाश्चात्याश्च सन्ति ।

अत एव अनुसन्धाता विभिन्नानां भाषाशिक्षणपुस्तकानाम् अध्ययनेन केषाञ्चन शिक्षणविधीनां विषय प्रस्तूयते येषां मौखिकाभ्यासेन साकं घनिष्ठः सम्बन्धः विद्यते ।

उच्चारणस्य प्रायोगित्वात् साक्षात् प्रायोगिकमौखिकविधिरेव प्राचीनकालात् आरभ्य उपयुज्यमानः वर्तते। अत्र केचन मौखिकाभ्यास-शिक्षणविधयः प्रस्तूयन्ते।

१. **गीतविधिः** – यथा गीतं गायन्ति तद्वद् अ,आ, इ,ई,इत्यादि वर्णानां गानं क्रियन्ते, गानमाध्यमेन पाठनात् अयं गीतविधिः । एषः विधिः शिशूनां कृते रूचिकरो भवति।

२. **पदप्रत्ययविधिः** – अस्मिन्विधौ पदमुच्चार्य पदस्थाकारदि वर्णस्य उच्चारणं शिक्ष्यते । यथा-अ-अग्निः, आ-आग्रम्, इ-इन्द्रः, ई-ईश्वरः, उ-उमा इत्यादयः। विधिरियं प्रान्तीय भाषास्वापि उच्चारणशिक्षणाय आधिक्येन उपयुज्यते ।

३. **अनुकरणविधिः-** छात्राः शिक्षककृत उच्चारणस्य अनुकरणं कुर्वन्ति । अतः शिक्षकाणामुच्चारणं अवश्यमेव शुद्धं स्यात् । शिक्षकः ध्वन्यभिलेखयन्त्रेणापि शुद्धोच्चारणस्य अभ्यासं कारयितुं शक्नोति ।

४. **परिष्कारविधिः**– कक्षायां संस्कृतस्यपाठनसमये शिक्षकः छात्रैः कृतस्याशुद्धोच्चारणस्य अभ्यासं कारयेत्। अनुवाचन-प्रश्नोत्तर- काठिन्यनिवारणादीनां च सोपानावसरे शिक्षकेण परिष्कारविधिः अनुसरणीया । अस्मिन् छात्राणां समवेतस्वरेण एकलस्वरेण च अभ्यासं कारयेत् । ये बालकाः अशुद्धमुच्चारयन्ति तेषां उपवेशनस्थानं परिवर्त्तनीयम् ।

५. **अभ्यासविधिः** – क्लिष्टानां वर्णानां शब्दानां च पुनः पुनरावर्तनेन उच्चारणाभ्यासः कर्त्तव्यः। शब्दविश्लेषणविधिमवलम्ब्य क्लिष्टशब्दानां खण्डशः उच्चारणं कारयित्वा सम्पूर्णशब्दानाम् उच्चारणाभ्यासः कारयितव्यः। छात्रेभ्यः जटिलवाक्यानाम् उच्चारणाभ्यासस्य अवसरः प्रदेयः ।

एवं मौखिकाभ्यासशिक्षणार्थं शिक्षाजगति एते शिक्षणविधयः अतीवोपकारकाः सन्ति ।

**संस्कृतभाषाशिक्षणे मौखिकाभ्यासस्य आवश्यकता –**

वैदिककाले वेदाभ्यासे वेदस्वीकरणं,विचारो, अभ्यासः, जपः, शिष्येभ्यो वेदानां दानञ्चेत्यादीनां पंचक्रियाणां समावेशो भवति स्म । एवं प्रकारेण प्राचीनकाले शिक्षविधौ मौखिकविधिः प्रमुखः आसीत् । प्रायतः सप्तदशशताब्दीपर्यन्तं आश्रमेषु,गुरुकुलेषु, मठेषु, पाठशालाषु ,विद्यापीठेषु, अयं विधिः नियमितरूपेण प्रचलितः आसीत्। पाठनसमये वेदशास्त्राणामुच्चारणं गुरवः यथैव कुर्वन्ति तथैव छात्राऽपि श्रद्धया श्रुत्वा गुरून् अनुकरणं कृत्वा पठन्ति। पुनः ते एकान्ते स्थित्वा तस्य मननं चिन्तनं स्वाध्यायनं कृत्वा आमूलाग्रं कण्ठस्थीकुर्वन्ति। प्रधानतया शास्त्रस्य कण्ठस्थीकरणम् अयमेवोद्देस्यमासीत् । इतोऽपि वेदाः पारायणरूपे पठन्ति। पारायणं नाम ग्रन्थस्य आद्याक्षराभ्य अन्ताक्षरं यावत् प्रयोगविधिमनुसृत्य सम्प्रदायिकविधिनां पठनमेव। तदेतत्पारायणमेव कण्ठस्थीकरणमीति वक्तुं शक्यते। पारायणमिति पारिभाषिकशब्दः। एतत् वेदपारायणम्, त्रिवृत्यपारायणम्, विकृतिपारायणम् इत्येवं विभिन्नः संज्ञाभिः प्रसिद्धः वेदशब्दराशेः पारायणमीति व्यवहारे आसीत् । पुनश्च पारायण उच्चारणसमये अशुद्ध्यनुसारेण छात्राणां परीक्षा अपि भवति स्म । एकशुद्धिकर्त्तारं छात्रं त्रैयनिकः कथ्यन्ते। एतदेव वारं-वारम् अभ्यासकरणेन अशुद्धिनां क्रमशः ह्रासः भवति । मौखिकाभिव्यक्तये सुशक्तत, प्रभावोत्पादकता, शिद्धता, भाषाप्रवाहः, स्वराघातश्चेति सम्यक् भवति । अतः भाषाशिक्षणे मौखिकाभ्यासस्य प्राधान्यं विदितमस्ति ।

**मौखिकाभ्यासस्य प्रयोगः –**

पौनः पुन्येन वर्णाभ्यासं कारयित्वा शुद्धोच्चारणं प्रतिपादयितुं शक्यते । यदि कोऽपि विद्यार्थी र-ल-त्र इत्याद्युच्चारणेऽसामर्थ्यं भजति तर्हि असौ र,रा,रि,री,रु,रू,रे.रै.रो.रौ.रं, रः। ल, ला, लि, ली, लु, लू, ले, लै, लो, लौ, लं, लः। त्र ,त्रा, त्रि, त्री, त्रु, त्रू, त्रे, त्रै, त्रो, त्रौ, त्रं, त्रः. इत्यादिरूपोच्चारणे अभ्यासयितव्यः।

उच्चारणसम्बद्धः–पाठानां निर्माणमपि कारयेत् यथा- न-ण ध्वनिभेद पाठः, स-ष- श ध्वनिभेदपाठः,स्वरागमदोनिवारणाय पाठः इत्यादयः।

क्लिष्टानां शब्दानां पुनः पुनरावर्त्तनेन उच्चारणाभ्यासः कारयितव्यः। यथा – प्रारम्भिकः –प्रा-रम्-भिकः इत्यादि । संस्कृतवर्णानां शुद्धतया उच्चारणाय प्रथमे वर्णान् शब्दान् च लेखनपट्टिकायामुपरि लिखित्वा पुनः पुनः पठनाय कथ्यते स्म । तद्वारा वर्णानां पृथक् पृथक् ज्ञानं दत्त्वा ततश्च मात्राणां संयोगं दर्शयित्वा ज्ञानं समृद्धं क्रियते ।

**उच्चारणगतदोषा हि द्विधा दूरीकर्त्तुं सम्भाव्यन्ते –**

**व्यक्तिशः** – एकैकशः छात्राय विविधशब्दानाम् उच्चारणावसरः प्रदातव्य कुत्र, का, कथं त्रुटिः भवति इति च अवबोधयितव्यः ।

**समूहशः** – एकस्यैव शब्दस्य समवेतरूपेणोच्चारणं कारयित्वा विभाज्य च त्रुटिः परिहर्त्तुं शक्यते ।

एतेषां विधिनां प्रयोगेण छात्राणां वर्णमालायाः ज्ञानं, शब्दानां च उच्चारणे शुद्धता आयाति ।